# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 3rd Semester Examination, 2019

## SANHGEC03T/SANGCOR03T-SANSKRIT (GE3/DSC3)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः – $2\times5 = 10$

(क) "स्वप्नवासवदत्तम्" इति नाटके विदूषकः कः ? राज्ञः उदयनस्य द्वयो-र्मन्त्रिणोर्नामनी लिखत।

(ख) पद्मावती का ? सा कथं तपोवनम् अगच्छत् ?

(ग) "दुःखं न्यासस्य रक्षणम्" – उक्तिरियं कस्याः ? अत्र 'न्यासः' इत्यनेन बोध्यते किम् ?

(घ) "स्वप्नवासवदत्तम्" इति ग्रन्थे कति अङ्काः सन्ति ? नाटकस्य नायकश्च कः ?

(ङ) कस्याः हस्ते किमुद्दिश्य यौगन्धरायणः वासवदत्तां न्यासरूपेण रक्षितवान् ?

(च) "धन्या सा स्त्री यां तथा वेति भर्त्ता" – कस्योक्तिरियम् ? का सा स्त्री धन्या भवति ?

(छ) स्वप्नवासवदत्ते नाटके आवन्तिका-वेशधारिणी काऽस्ति ? वासवदत्तायाः धात्री वा का ?

(ज) नाटकेऽस्मिन् केन का स्वप्ने दृष्टा ?

### SECTION-B

2. यथाभिमतं प्रश्न द्वयस्य उत्तरं देयम् – $10\times2 = 20$

(क) "अभिज्ञानशकुन्तलम्" इति नाटकस्य प्रथमाङ्के मत्तगजोपाख्यानस्य संयोजनमपरिहार्यमस्ति न वेति विविच्यताम्।

(ख) "अभिज्ञानशकुन्तलम्" इति नाटकस्य चतुर्थाङ्के दुर्वाससोऽभिशापवृत्तान्तस्य संयोजनस्य नाटकीयतात्पर्यं विचार्यताम्।

(ग) कण्वाश्रमात् शकुन्तलायाः पतिगृहयात्रादृश्यं सम्यक् प्रदर्शनीयम्।

(घ) "अभिज्ञानशकुन्तलम्" नाटकमाश्रित्य "उपमा कालिदासस्य" इत्युक्तिर्विवेचनीया।

3. अधोधृतेषु यथेच्छं <u>चत्वारः</u> प्रश्नाः समाधेयाः। तेषु एकः संस्कृतभाषया देवनागरलिप्या च समाधेयः। 5×4 = 20

(क) सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥ – इति व्याख्यायताम्।

(ख) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुको भवति यत्सुखितोऽपिजन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि॥ – इति व्याख्यायताम्।

(ग) स्वप्नो नु माया नु मतिभ्रमो नु क्लिष्टं नु तावत्फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाताः॥ – इति व्याख्यायताम्।

(घ) 'हंसपदिका' इत्याश्रित्य टीका रचनीया।

(ङ) 'नान्दी' इति अवलम्ब्य टीका लेख्या।

(च) 'विदूषकः' इति विषयमवलम्ब्य टिप्पनी करणीया।

——×——